# <u>संस्कृत कक्षा - अष्टम, पाठ:एकादश: द्वादश्च</u>

•

**1.** अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।
उपरि निर्मितं चित्रं पश्यत। इदं चित्रं कस्याश्चित् पाठशालायाः वर्तते। इयं सामान्या पाठशाला नास्ति। इयमस्ति महाराष्ट्रस्य प्रथमा कन्या-पाठशाला। एका शिक्षिका गृहात् पुस्तकानि आदाय चलति। मार्गे कश्चित् तस्याः उपरि धूलिं कश्चित् च प्रस्तरखण्डान् क्षिपति। परं सा स्वदृढनिश्चयात् न विचलति।

i. एकपदेन उत्तरत।
(क) इयं पाठशाला कस्य राज्यस्य अस्ति? ( ख) मार्ग कश्चित् तस्याः उपरि किं क्षिपति?

ii. पूर्णवाक्येन उत्तरत।
क) शिक्षिका गृहात् किं नीत्वा चलति?

iii. निर्देशानुसारम् उत्तरत।
क) 'प्रथमा' इति विशेषणपदस्य विशेष्यपदं किम्?

**2**. गद्यांशं पठित्वा प्रश्नान् उत्तरत।
परमिन्दरः: पश्यन्तु पश्यन्तु, यत्र-तत्र प्लास्टिक-स्यूतानि अन्यच्चावकरं प्रक्षिप्तमस्ति। कथ्यते यत् स्वच्छता स्वास्थ्यकरी, परं वयं तु शिक्षिताः अपि अशिक्षित इवाचरामः।
रोजलिन्: महोदय! मार्गे अवकरं प्रक्षिपन्तं बालकान् किमर्थं न निवारयन्ति?

i. एकपदेन उत्तरत।
क) सर्वत्र कानि प्रक्षिप्तानि सन्ति? ख) स्वच्छता कीदृशी भवति?

ii. पूर्णवाक्येन उत्तरत।
क) रोजलिन् महोदयं किं कथयति?

**3**. उचितं मेलनं कुरुत।

| <u>'क' स्तम्भः</u> | <u>'ख' स्तम्भः</u> |
|---|---|
| अ. सावित्री बाई फुले | अ. स्वास्थ्यकरी \| |
| ब. स्वच्छता | आ. महाराष्ट्रस्यप्रथमाशिक्षिका |
| स. अवकरः | इ. प्लास्टिक-स्यूतानि \| |

**4.** सन्धिविच्छेदं कुरुत।
(क)अध्ययनेनापि = _+ _ (ख)इवाचरामः = _ + _ (ग) पुस्तकान्यादाय = _ + _

**5.** उपसर्गं युक्त्वा पदनिर्माणं कुरुत -
क) अनु + गच्छति = _ (ख) प्रति + वसति =_ (ग) सम् + हरति = _ (घ) परि + त्यजति = _

**6**.अधोलिखितपदेभ्यःउपसर्गं धातुं च पृथक् कुरुत
क) प्रचलति = _ + _ ख) आदाय = _ + _ (ग) विचलति = _+ _ घ) आरभत = _ + _

**7**. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।
क) सावित्री कन्यानाम् कृते पाठशालाम् आरभत। (ख) मार्गे अवकरं प्रक्षिप्तम् अस्ति।
ग) प्लास्टिकस्य मृत्तिकायां लयाभावात् पर्यावरणस्य हानिः भवति।
घ) सावित्री स्वदृढनिश्चयात् न विचलति।

**8**. मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत।
(मञ्जूषा: पर्यावरणस्य, शिक्षिका, प्लास्टिक-स्यूतानाम्, दृढनिश्चयात्, आरोग्याय)
क) सावित्री बाई फुले भारतस्य प्रथमा महिला ____ आसीत्। (ख) सा कदापि स्व ________ न विचलति स्म।
ग) स्वच्छता ________ परमावश्यकी अस्ति। (घ) अस्माभिः ________ प्रयोगः न्यूनः करणीयः।
ङ) वृक्षाणां कर्तनेन ________ हानिः भवति।

I